युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः । (१०५/२१६२)

'लस्य' (३.४.७७/२१५३) इत्यधिकृत्य सामान्येन तिबादयो विहिताः । तेषामयं पुरुषनियमः क्रियते । युष्मद्युपपदे सति व्यवहिते चाव्यवहिते [1]सति समानाधिकरणे समानाभिधेये तुल्यकारके स्थानिनि [2]प्रयुज्यमानेऽ[3]प्य-प्रयुज्यमानेऽपि मध्यमपुरुषो भवति । त्वं पचसि । युवां पचथः । यूयं पचथ । अप्रयुज्यमानेऽपि – पचसि । पचथः । पचथ[4] ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च । (१०६/२१६३)

प्रहासः परिहासः [5]क्रीडा । प्रहासे[6] गम्यमाने मन्योपपदे धातो[7]र्मध्यमपुरुषो भवति, मन्यतेश्चोत्तमः, स च एकवद् भवति । एहि मन्ये ओदनं भोक्ष्यसे इति, न [8]हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन [9]ते पिता । मध्यमोत्तमयोः प्राप्तयोः उत्तममध्यमौ विधीयेते । प्रहासे इति किम् ? एहि मन्यसे ओदनं भोक्ष्ये [10]इति । सुष्ठु[11] मन्यसे । [12]साधु मन्यसे ॥

अस्मद्युत्तमः । (१०७/२१६४)

[13]उत्तमपुरुषो नियम्यते । अस्मद्युपपदे [14]समानाभिधेये [15]प्रयुज्यमानेऽप्यप्रयुज्यमानेऽपि उत्तमपुरुषो भवति । अहं पचामि । आवां पचावः । वयं पचामः । [16]अप्रयुज्यमानेऽपि--पचामि । पचावः । पचामः ॥

शेषे प्रथमः । (१०८/२१६५)

शेषः इति मध्यमोत्तमविषयादन्य उच्यते । यत्र युष्मदस्मदी समानाधिकरणे [17]उपपदे न स्तः, तत्र शेषे प्रथमपुरुषो भवति । पचति । पचतः । पचन्ति ॥

परः संनिकर्षः संहिता । (१०९/२८)

परशब्दोऽ[18]तिशये वर्तते । संनिकर्षः प्रत्यासत्तिः । परो यः सन्निकर्षः, वर्णानामर्धमात्राकाल[19]व्यवधानं, [20]स संहितासञ्ज्ञो भवति । [21]दध्यत्र । मध्वत्र । संहिताप्रदेशाः--'[22]संहितायाम्' (६.१.७२/१४५) इत्येवमादयः ॥

विरामोऽवसानम् । (११०/२७)

विरतिः विरामः । विरम्यतेऽनेन इति [23]वा विरामः । सो[24]ऽवसानसञ्ज्ञो भवति । [25]दधिँ । मधुँ (८.४.५७/११०) । वृक्षः । प्लक्षः (८.३.१५/७६) । अवसानप्रदेशाः--'[26]खरवसानयोर्विसर्जनीयः' (८.३.१५/७६) इत्येवमादयः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥

---

1. च क. फ. 2. अपि इत्यधिकम् अ. ड. फ. 3. अपि नास्ति फ 4. युष्मद्युपपदे इति किं? पचति देवदत्तः इत्यधिकम् क, समानाधिकरणे इति किम् ? त्वया पच्यते ओदनः इत्यधिकम् अ.क.ड. 5. क्रीडा नास्ति फ. ह.ई, परिहासक्रीडा ब. 6. च इत्यधिकम् अ. 7. मध्यमः पुरुषः अ.ड.फ.ह. 8. हि नास्ति क. 9. ते नास्ति ड.फ.ह. 10. इति नास्ति फ. 11. च इत्यधिकम् ह. 12. साधु मन्यसे नास्ति फ. 13. अस्मदि इत्यधिकम् ह. 14. समाधिकरणे क.फ.ह. 15. व्यवहिते अव्यवहिते च इत्यधिकम् अ. फ, स्थानिन्यपि इत्यधिकम् ह. 16. अप्रसज्यमाने ब, उदाहरणमिदं नास्ति ह. 17. उपपदे नास्ति क. फ. ह. 18. अत्र इत्यधिकम् ह. 19. °व्यवधानः ब. क. ड. ह. 20. स नास्ति फ. 21. वृध्यत्र क. 22. स्वरितात् इत्यधिकम् ड. 23. वा नास्ति क. फ. 24. विरामः इत्यधिकम् ह. 25. दधि, मधु अ. ब. क. इ. फ. ग. ह. 26. वावसाने (8.4.56/206) फ.